# Yamagitastavanam

# યમગીતાસ્તવનમ્

## Document Information

Text title : Yamagitastavanam

File name : yamagItAstavanam.itx

Category : vishhnu, dashAvatAra, stava, giitaa, narasiMhapurANa, viShNu

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa, narasiMhapurANa | adhyAya

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

# યમગીતાસ્તવનમ્

શ્રીગણેશાય નમઃ । શ્રીલક્ષ્મીનૃસિંહાય નમઃ ।
ૐ નમો ભગવતે તસ્મૈ નૃસિંહાય મહાત્મને ।
યન્નામ કીર્તનાત્સદ્યો નરકાગ્નિઃ પ્રશામ્યતિ ॥ ૧॥

ભક્તપ્રિયાય દેવાય રક્ષાય હરયે નમઃ ।
લોકનાથાય શાન્તાય યજ્ઞેશાયાદિમૂર્તયે ॥ ૨॥

અનન્તાયાપ્રમેયાય નારસિંહાય તે નમઃ ।
નારાયણાય ગુરવે શઙ્ખચક્રગદાભૃતે ॥ ૩॥

વેદપ્રિયાય મહતે વિક્રમાય નમોનમઃ ।
વારાહાયાપ્રતર્ક્યાય વેદાઙ્ગાય મહીભૃતે ॥ ૪॥

નમો દ્યુતિમતે નિત્યં બ્રાહ્મણાય નમોનમઃ ।
વામનાય બહુજ્ઞાય વેદવેદાઙ્ગધારિણે ॥ ૫॥

બલિબન્ધનદત્તાય વેદપાલાય તે નમઃ ।
વિષ્ણવે સુરનાથાય વ્યાપિને પરમાત્મને ॥ ૬॥

ચતુર્ભુજાય શુદ્ધાય શુદ્ધદ્રવ્યાય તે નમઃ ।
જામદગ્ન્યાય રામાય દુષ્ટક્ષત્રાન્તકારિણે ॥ ૭॥

રામાય રાવણાન્તાય નમસ્તુભ્યં મહાત્મને ।
અસ્માન્નુદ્ધર ગોવિન્દ પૂતિગન્ધાન્નમોઽસ્તુ તે ॥ ૮॥

વ્યાસ ઉવાચ-
ઇતિ સઙ્કીર્તિતે વિષ્ણૌ નારકૈર્ભક્તિપૂર્વકમ્ ।
તદા સા નારકી પીડા ગતા તેષાં મહાત્મનામ્ ॥ ૯॥

કૃષ્ણરૂપધરાઃ સર્વે દિવ્યવસ્ત્રવિભૂષિતાઃ ।
દિવ્યગન્ધાનુલિપ્તાઙ્ગાઃ દિવ્યાભરણભૂષિતાઃ ॥ ૧૦॥

તાનારોપ્ય વિમાનેષુ દિવ્યેષુ હરિપૂરુષાઃ ।
તર્જયિત્વા યમભટાન્ નીતાસ્તે કેશવાલયમ્ ॥ ૧૧॥

નારકેષુ ચ સર્વેષુ નીતેષુ હરિપૂરુષૈઃ ।
વિષ્ણુલોકં યમો ભૂયો નમશ્ચક્રે તદા હરિમ્ ॥ ૧૨॥

યન્નામકીર્તનાદ્ધાતાઃ નારકા કેશવાલયમ્ ।
તન્નમામિ સદા દેવં નારસિંહમહં ગુરુમ્ ॥ ૧૩॥

તસ્ય વૈ નરસિંહસ્ય વિષ્ણોરમિતતેજસઃ ।
પ્રણામં યેઽપિ કુર્વન્તિ તેભ્યોઽપીહ નમોનમઃ ॥ ૧૪॥

દૃષ્ટ્વા પ્રશાન્તં નરકાગ્નિમુગ્રં
યન્ત્રાદિ સર્વં વિપરીતમત્ર ।
પુનઃ સ શિક્ષાર્થમથાત્મદૂતાન્
યમો હિ વક્તું કૃતવાન્મનઃ સ્વયમ્ ॥ ૧૫॥

ઇતિ શ્રીનરસિંહપુરાણે યમગીતાનામ સ્તવનં સમ્પૂર્ણમસ્તુ ।

Proofread by M K Barman

*Yamagitastavanam*
pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*